# भूमिका

वेदेषु तथा वेदाविरोधिस्मृतिपुराणेतिहासादिषु शास्त्रेषु धर्मार्थकाममोक्षाख्या चतुर्विधापुरुषार्थाः सन्तीत्युक्तम् । तत्रापि मोक्षस्य परमपुरुषार्थत्वं बहुधा कीर्त्तितम् । पुरुषार्थान्तराणामनित्यत्वं प्रत्यक्षेणानुमित्यादिना वा ज्ञायते । मोक्षस्य तु नित्यत्वात्तस्मिन्नेव सर्व्वेषां वेदादिशास्त्राणां पर्यवसानात् । यद्यपि तत्त्वदर्शनभेदेषु मुक्तिस्वरूपमन्यथाऽन्यथा च प्रोक्तं न च मुक्तेरन्यथात्वं युक्तियुक्तम्, तथापि वेदान्तातिरिक्तशास्त्राणां परम्परैव वेदान्तार्थबोधकत्वाद्वेदान्तप्रमाणकामुक्तिरेव शास्त्रान्तराणां परमतात्पर्यविषयभूतेत्यन्ते तत्त्वशास्त्रोक्तमुक्तीनां वेदान्तोक्तमुक्त्या एकत्वं पर्यवस्यते ।

तत्र मुक्तिविषये भिन्नाभिन्नदर्शनेषु यदा मतभेदाः विद्यन्ते तदा साधारणलोकेषु मुक्तिविषये मतानैक्यं सम्भवेदित्यत्र किमाश्चर्यम् ? केचित् स्वर्ग एव मुक्तिरिति कथयन्ति । चार्वाकास्तु मृत्युरेव मुक्तिरिति - अथवा, अङ्गनालिङ्गनादिजन्यं सुखं मुक्तिरिति कथयन्ति । केचित्तु भगवल्लोकप्राप्तिं मुक्तिरिति मन्यन्ते । अन्ये तु भगवच्छरीरे लय एव मुक्तिरिति कथयन्ति । केचित्तु भगवल्लोकप्राप्तिं मुक्तिरिति मन्यन्ते । अन्येतु भगवच्छरीरे लय एव मुक्तिरिति कथयन्ति । दार्शनिकानां मध्ये केचिदात्यन्तिकदुःखनिवृत्तिं, केचित् संसारोच्छेदं, केचित् संसारसम्बन्धोच्छेदं, केचित्तु नित्यसुखाभिव्यक्तिमपरे तु स्वात्मस्वरूपावस्थानं मुक्तिं प्रपद्यन्ते । सात्मस्वरूपावस्थानं मुक्ति-

रिति सत्यं परन्तु आत्मस्वरूपविषये शास्त्रकाराणां विप्रतिपत्तिरस्ति । केचित्तु ज्ञानाज्ञानस्वरूपं, केचित्तु ज्ञातृस्वरूपमन्ये तु ज्ञानमात्रस्वरूपं, वेदान्तिनस्तु सत्यज्ञानानन्दस्वरूपमात्मनो यथार्थत्वमिति कीर्त्तयन्ति । तत्रापि वेदान्तातिरिक्तवादिनामात्मनो नानात्वमभिहितम् । वेदान्ते त्वेकत्वमेवात्मन: । न च सत्यज्ञानानन्दत्वमात्मनो विशेषणम् । सत्य-विशिष्टो ज्ञानविशिष्ट आनन्दविशिष्ट आत्मेति तु नैव वेदान्ताभिमत: । तथा सति सत्यज्ञानानन्दानां विशेषणत्वे आत्मनो विशिष्टत्वापत्ति: । विशिष्टत्वे च श्रुतिविरोध: । "नेह नानाऽस्ति किञ्चन" ( बृह० ४/४/१९, कठो २/१/११ ) "अशब्दमस्पर्शमरूपमव्ययम्" ( कठोप० १/३/१५ ; मुक्तिकोप: २/७२ ), "तथाऽरसं नित्यमगन्धवच्च यदनाद्यनन्तं महत: परं ध्रुवं निचाय्य तन्मृत्युमुखात् प्रमुच्यते" ( कठ० १/३/१५ ) "नेति नेति" ( बृह० २/३/६ ), "मृत्यो: स मृत्युमाप्नोति य इह नानेव पश्यति" ( बृह० ४/४/१९ ; कठ २/१/११ ) इत्यादिना सर्वविशेषनिषेधात् सर्वद्वैतरहितत्वमात्मन: स्वरूप-मिति श्रुत्युक्तार्थे न विरोध: स्यात् । तस्मात् सत्यज्ञानानन्दस्यासत्या-दिव्यावृत्तिमुखेन निर्विशेषं परं ब्रह्मैवात्मेति बोधनं परमतात्पर्यम् । एवञ्च सत्यज्ञानानन्दस्वरूपमात्मन्यवस्थानं मुक्तिरिति ज्ञायते । अवस्थानमित्यत्र नाधाराधेयभावे तात्पर्यम् । परन्तु, आत्माश्रिताविद्या कर्त्तृभोक्तृसंसार्या-दिरूपेण जीवस्य स्वस्माद्विच्युतिरेव मन्यते अविद्यामपेक्ष्याविद्यानिवृत्त्या संसारान्निवृत्त्यात्मस्वरूपेऽवस्थानमिति गौणतया लक्षणया वाऽवस्थानमित्युच्यते ।

वस्तुतः, अविद्यानिवृत्तिरेव मुक्तिस्वरूपम् । तथा चोक्तं वार्त्तिककारैः "अविद्यास्तमयो मोक्षः सा च वन्ध उदाहृत" इति ।

अविद्या एव वन्धनम् । अविद्यानिवृत्तिरेव मुक्तिरित्यर्थः । अविद्यानिवृत्तिश्च साश्रयविषयकविद्यया भवति । अतो यावदात्मविषयकज्ञानं न जायते तावदात्माश्रिताऽविद्या वर्त्तते ; तावच्च वन्धनम् । वेदान्तवाक्यादुदिते आत्मज्ञानेऽविद्या निवर्त्तते । अविद्यानिवृत्तौ तत्कार्यस्यापि संसारस्य सञ्चितकर्मादीनाञ्च निवृत्तिर्भवति । प्रारब्धकर्मणां त्वारब्धत्वेन सहसा निवृत्तिर्नभवत्युत्पन्नायामपि विद्यायाम् । प्रारब्धकर्मानिवृत्त्या उच्छिन्नसर्वकार्यसहिताविद्यकस्य शरीरमात्रस्थितिकस्य पुरुषस्य जीवन्मुक्तिर्भवति । प्रारब्धभोगेन प्रारब्धकर्मनिवृत्तौ तु शरीरनाशादनन्तरमविद्यादिसर्वनिवृत्त्या कैवल्यमुक्तिर्भवति । सैव विदेहमुक्तिरित्यप्युच्यते । एवंविधयो जीवन्मुक्तिकैवल्यमुक्त्योः प्रकारभेदं स्वरूपभेदं प्रमाणादिकञ्चास्मत्कृते मूलनिवन्धे विवेचितमिति नात्र विशिष्यते । तत्र --

प्रथमेऽध्याये - विवेच्यविषयस्य प्राथमिकः परिचयः ।

द्वितीयेऽध्याये - जीवन्मुक्तेर्लक्षणम्

तृतीयेऽध्याये - जीवन्मुक्तेः स्वरूपम् ।

चतुर्थेऽध्याये - जीवन्मुक्तावनुपपत्तेः परिहारः

पञ्चमेऽध्याये - जीवन्मुक्तेरुपयोगित्वम्

षष्ठेऽध्याये - उपसंहारः

अस्य निबन्धस्य रचनायां मया यथाशक्ति यथामति प्रयासः कृतः । सर्वेषां दर्शनशास्त्राणां सागरसदृशानां समुचितमनुशीलनं मितमतिना जनेन सर्वथा कर्तुमशक्यमेव विशेषतः मादृशानाम् । तथापि पूर्वपुरुष-संस्कारवशाद्विषयेषु स्वाभाविकोऽनुरागो जातः । अतएव, विषयेऽस्मिन् दुरवगाहेऽपि प्रवृत्तः । यानं विना खञ्जस्य गमनमिव मम शास्त्रज्ञजनशरणं विना एतदसम्भवमेव । तत्र सौभाग्यवशात् इदानीन्तनभारतीयदर्शनवेतॄणामन्य-तमः श्रीमद्दण्डिस्वामिदामोदराश्रमपादः मामन्तेवासित्वेन स्वीकृतवान् । नानाकृत्यव्यस्तोऽपि स दार्शनिकप्रवरः मां प्रत्यनुग्रहं कृतवान् । प्रतिमा-निर्माणे मृत्तिका इवास्यप्रबन्धस्य निर्माणे तस्य गुरुवरस्योपदेशः प्रधानं कारणम् । अतएवान्ते तदीयपदारविन्दे प्रणतिं कृतज्ञताञ्च निवेदयामि ।

अस्मिंश्चावसरे परमाराध्यतमयोः मातापित्रोः करुणां स्नेहञ्च संस्मृत्य तयोः पदारविन्दे सभक्तिप्रणतिं निवेदयामि ।

कलिकाताविश्वविद्यालयस्य अध्यापकप्रवरः श्री नारायणचन्द्रगोस्वामि-महोदयः विश्वविद्यालयीयनियमानुसारं निबन्धस्यास्य रचनायां मां प्रति करुणावशात् पर्यवेक्षकः लब्धः । तदीयनिर्देशमनुसृत्य निबन्धोऽयं विरचितः । तदीयपादपद्मे सभक्तिं प्रणतिं कृतज्ञताञ्च निवेदयामि ।

अन्येऽपि केचन महानुभवा विशेषतः श्रीमत् रक्षाकरस्मृतितीर्थ-महाशयाः मदीयमुपकारं कृतवन्तः । तान् प्रत्यपि कृतज्ञतां निवेदयामि ।

भारतीयदर्शनमतीव विशालम् । तत्र प्रवेशो व्युत्पत्तिश्च प्रयासेन श्रमेण च लभ्यते । सप्रतिभावुद्धिश्च अपेक्ष्यते । तथापि मया मितमतिना गुरुवराणामुपदेशानुसारं प्रयासः श्रमश्च कृतः । तत्फलरूपोऽयं निवन्धो भवतां पुरत उपस्थाप्यते । अस्य निवन्धस्योत्कर्षापकर्षविषये मया मौनिना भूयते । अन्ते जयन्तभट्टवचनमुल्लिख्य विरम्यते --

"असंख्यैरपि नात्मीयैरल्पैरपि परस्थितैः ।
गुणैः सन्तः प्रहृष्यन्ति किमेषां विचेष्टितम् ।।" इति ।

पौषसंक्रान्तिः
१३०४

विनीतः

आशिसकुमार मुखोपाध्यायः